International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(2): 43-47
© 2026 IJMH
www.themultijournal.com
Received: 26-02-2026
Accepted: 09-03-2026
Publish : 10-03-2026

**कौशिक हालदारः**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः-517507

**Correspondence:**
**कौशिक हालदारः**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः-517507

# बङ्गकविबाणेश्वरविरचितचित्रचम्पूकाव्यस्य रसतात्त्विकविश्लेषणम्

**कौशिक हालदारः**

**शोधसारः-**

बङ्गदेशीयमहाकविबाणेश्वरभट्टेन विरचितं बैष्णवभक्त्याश्रितं चित्रचम्पूकाव्यम्। इत्यस्मिन् काव्ये बर्धमानराजचित्रसेनस्य स्वप्नावस्थायां वैकुन्ठभ्रमणं वर्णनाचातुर्येण प्रतिपाद्यते। शान्तरसस्यैव अत्र प्राधान्यता विद्यते। परन्तु अपराः रसाः अपि अङ्गरसरूपेण विद्यन्ते। तेषां रसानां लक्षणं बिधाय पर्यालोचनापूर्वकं सश्लोकैः विचारः पुनः विश्लेषणमत्र प्रदास्यते।

शोधपत्रेऽस्मिन् वैष्णवभक्तिप्रसूतचम्पूकाव्ये अङ्गीरसरूपेण शान्तरसः पुनः अपराः वीरबीभत्सरौद्र-भयानकादिरसाः अङ्गरूपेण कथं प्रतिपादितं महाकविना वाणेश्वरेण तदेव प्रतिपादनं मम शेधपत्रस्य मूलाशयः। अपि चात्र अलङ्कारसम्प्रदायाः, तेषु षट्-सम्प्रदायेषु रससम्प्रदायस्य अवस्थानं प्रवर्तकः गुरुत्वं च समुपवर्णिताः।

**प्रमुखविन्दवः- अलङ्कारशास्त्रसम्प्रदायाः, रससम्प्रदायः, अथरसनिरूपणम्- 1.शान्तरसः, 2.वीररसः, 3. रौद्ररसः, 4. अद्भुद्रसः, 5. भयानकरसः, 6. हास्यरसः।**

**प्रस्तावना-**

लोकोत्तरवर्णनानिपुणकविकर्मभूतस्य काव्यस्य परमं रहस्यं जीवातुभूतं तत्वं रसमेवाङ्गीकुर्वन्ति समालोचकाः। आलंकारिकाश्च तथैवोपदिशन्ति यथा- 'वाग्वैदग्ध्यप्रधानेऽपि रस एवाऽत्र जीवितम्'[1] इति काव्यस्याङ्गिनि रसादिरूपे न कस्यचिद् विमतिः[2] इति महिमभट्टोऽपि निरुपयति।

महाकविदण्डीनोक्तम्-

'**मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः**'[3] अन्यत्र च '**कामं सर्वेऽप्यलङ्कारो रसमर्थे निषिञ्चतु**[4]'। इति। आनन्दवर्धनप्रभृतयः आचार्याः नीरसं काव्यं निन्दन्ति- '**नीरसस्तु प्रबन्धो य सोऽपशब्दो महान् कवेः**'[5]। इति।

तत्र लौकिका एव पदार्थाः कविप्रतिभया पुनः वर्णनाचातुर्येण सौन्दर्यसारसम्भृताः सन् पुण्यपा-कसौभाग्यशालिनां सहृदयानां हृदयं प्रविष्टा रसनिर्झरान् प्रवाहयन्ति। वस्तुतः महाकविनां वाणी नीरसं जगद् वस्तुतः सरसतामापादयन्ति **जगद्गावाप्रख्यं निजरसभरात् सारयति च**।। इति।

**सरस्वती स्वादुतदर्थवस्तु निःस्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्** [6]।। इति।

लोकशास्त्रविलक्षणशब्दार्थमयस्य काव्यस्येदमेव वैशिष्ट्यं यत् ललितोचित- सन्निवेशवशात् ग्रावप्रख्यं जगत् सरसं सम्पादयति, तानेव पदार्थान् प्रतिभावशान्मधुमासद्रुमा इव सर्वथाभिनवान् सम्पाद्य कविश्च प्रजापतिमतिशेते।

अत एव काव्यप्रयोजननिरूपणाऽवसरे मम्मटः रसास्वादं सकलप्रयोजनमौलिभूतमाह **'सद्यः परनिर्वृत्तये'** इति । रस एव सहृदयानां रागं जनयति, तदास्वादायैव ते काव्ये प्रवृत्ता भवन्ति, अतो नीरसं काव्यमुपनिबन्धनं कविरुपहास्यतां याति, चम्पूकारा अपि एवं निगदन्ति।

तदुक्तम्-

**अप्रगल्भाः पदन्यासे जननीरागहेतवः।**
**सन्त्येके बहुलालापाः कवयो बालका इव**।। इति।

**किं कवेस्तेन काव्येन किं काण्डेन धनुष्मतः।**
**परस्य हृदये लग्नं न घूर्णयति यच्छिरः**[7]।। इति च।

**अलङ्कारसम्प्रदायाः-**

काव्यस्यात्मा कः? पुनः किं तद्वस्तु येन काव्ये काव्यत्वं तिष्ठति यदभावे च तदपसरतीति जिज्ञासायां वहुभिः आचार्यैः स्वस्वमतेन काव्यात्मभूतस्य तत्त्वस्य निरुपणं कृतम्। केचित्तु अलंकारं केचिद्रीतिं केचिच्च ध्वनिं काव्यत्वेन प्रमाणयति। भरतमुनितः आरभ्यः कालक्रमेण विभिन्नशताव्दीषु नवीननवीनतरसम्प्रदायानामुत्पत्ति-र्जाता। सिद्धान्तगतवैमत्यमवलम्ब्य अलंकारशास्त्रे षट् सम्प्रदायाः उद्भवन्। क्रमेण इमे सम्प्रदायाः निर्दिष्टाः --1.**अलंकारः**, 2.**रीतिः**, 3.**रसः**, 4.**ध्वनिः** 5.**वक्रोक्ति**, 6. **औचित्यसम्प्रदायश्च**।

**रससम्प्रदायः-**

आचार्यः नन्दीकेश्वरः एव रससम्प्रदायस्य प्रणेता इति काव्य-मीमांसाकारस्याभिमतम्। परन्तु अद्यापि नान्दीकेश्वरेण प्रणित-मेकमपि ग्रन्थमस्माभिः नोपलभ्यते। अतः भरतनमुनिरेव रस-सम्प्रदायस्य आदि प्रवर्तकः इति मन्यन्ते बुधैः। यद्यपि वैदिकसाहित्ये रसादिशब्दानामुल्लेखोऽवश्यं दृश्यते किन्तु आलंकारिकसम्प्रदाय-प्रवर्तकेषु नाट्याचार्यः भरतमुनिः चैतत्स्वरूपनिश्चयकरणे सर्वप्रथमं श्रेयोभागिनं इति वक्तुं शक्यते अस्माभिः।

रसस्वरूपं प्रतिपादयन्नाह भरतमुनिः 'रसः इति कः पदार्थः'? कथ्यते आस्वाद्यमानत्वात्। कथमास्वाद्यते रसः। यथा हि नाना व्यञ्जनसंस्कृतमन्नं भूञ्जाना रसमास्वादयन्ति सुमनसः हर्षादिश्चा-धिगच्छन्ति तथा नानाभावभिनयव्यञ्जितात् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षकाः हर्षादिश्चाधिगच्छन्ति पुनः कानि साधनानि सन्ति यानि रसं निष्पादयन्तीति प्रश्ने – भरतमुनिना स्वीयनाट्यशास्त्रग्रन्थस्य षष्ठे सप्तमे चाध्याये उक्तम् –

**"विभानुभावव्यभिचारिसंयोगातद् रसनिष्पत्तिः"**[8]

अत्र विभावाः कारणानि, अनुभवा कार्याणि, सहकारिणश्च सन्ति व्यभिचारिणः। एतेषां संयोगाद्रसनिष्पत्तिः भवति। एतदभिप्रायं सरलतयाः काव्यप्रकाशकारः मम्मटः निबबन्ध-

**कारणान्यथ कार्याणि सहकारिणि यानि च ।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।।**
**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।**
**व्यक्तः स तैर्विभावाद्यैः स्थायीभावः रसः स्मृतः**।।[9]

जगति यौवनोद्रेकाद उदभिन्नचित्तवृत्तीनां नायकानां नायिकानां च मिथो दर्शनेन गुणश्रवणेन वा प्रीतिः जायते। ततः नायकनायिकयोः लावण्यालङ्कारादिभिः तटस्थैः उद्यानमन्दपवनादिभिः चन्द्राभिः उद्दीपितासा प्रीतिरुत्कण्ठापरपर्याया-ऽभिनाषरूपतां प्रतिपद्यते। उत्कटोत्कण्ठाकारिणी प्रीतिः एव रतिपदवाच्यम्। एखमुक-ण्ठित-योस्तयोः समागमोपायम्- अन्विष्यमाणयोः कदाचिच्चन्ता, कदाचि-त्ग्लानि, कदाचिद् शङ्कादिरूपविविधाश्चित्तवृत्तयो जायन्ते। इमा वृत्तयो व्यभिचरन्ति अतो व्यभिचारिभावः। रतिश्च सर्वासु वृत्तिषु सर्वेषु भावेषु स्रक्सूत्रसायेन अनुस्यूता कदाचिन्निमग्ना, कदाचिद् उन्मग्ना अपि स्थायिता प्रतिपाद्यते। ततस्तदुभयोः स्थायिभा-वव्यभिचारिभावयोः व्यञ्जिकाश्चेष्टा जायन्ते। ताश्च तयोः कार्यरूपा अनुभावाः कथ्यन्ते। ततः स्वयं दूत्यादिकृतोपायेन वा तयोः सङ्गमे जाते सति चित्तं स्थिरतामाप्नोति सा प्रीतिः। उत्तरोत्तरमुज्जृम्भते चिन्तादयश्च दूरीभवन्ति। केवला नायिका तत्चेष्टादिमिश्श्रा विलक्षणा तन्मयावस्थापन्ना आस्वादा एवानुभवविषयतां जायन्त इति वस्तुस्थितिमनुभवन्ति विदग्धाः। एवं रूपेण रत्यादयः भावा वासनारूपेण मानवानां हृदि वर्तन्ते कदाचित् स्वकारणं प्राप्य समुद्भूता भवन्ति। अन्यथा सात्मभूताः तिष्ठन्ति। जगति तेषां भावानामुद्बोधकानि कारणानि यानि आलम्ब्य रत्यादिस्थायिनोः भावा उद्बुद्धा भवन्ति, तानि आलम्बनकारणानि कथ्यन्ते। यानि कारणानि च उद्बुद्धान् भावानुद्दीपयन्ति, लावण्यालङ्कारः उद्यान-मन्दमारुतचन्द्रिकाप्रभृतयः तानि एव उद्दीपनकारणानि। यानि च रत्यादेः कार्याणि कटाक्षभुजाक्षेपप्रभृतयःयानि च शङ्काग्ला-निहर्षहासादिनि सहकारिकारणानि तानि सर्वानि काव्ये नाट्ये च उपनिबद्धमानानि आलम्बनविभावाः उद्दीपनविभावाः, कार्यानि अनुभावाः, सहकारिकारणानि व्यभिचारिभावाः। यतो हि ते विभा-वयन्ति रत्यादीन् आस्वादाङ्कुरयोग्यतां नयन्ति इति विभावाः, अनुपश्चाद् भावयन्ति इति अनुभावाः। विशेषेण अभिमुखं चरन्तीति व्याभिचारिणः, इति।

एवं रूपेण रसविषयः प्रतिपादयन् रसः प्रकाराः निर्देशितमाचार्यैः। स च रसः नवविध- **शृङ्गारहास्यकरूणरौद्रवीरभयानकाः।**

**वीभत्साद्भूतसंज्ञौ चेत्यष्टौ नाट्ये रसा: स्मृताः**।।[10] इति।

**निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः**।[11] इति।

एतेषु रसेषु एकैव रसः अङ्गीरसः भवति। वीरो वा शृङ्गारो वा शान्तो वा, अन्ये रसाः अङ्गरसरूपेण भवन्ति। उक्तं तद् विश्वनाथेन-

**शङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।**[12]

दिशा चम्पूकाव्येऽपि प्रबन्धकाव्यत्वेन एषैव नियमः। सर्वत्र एषः नियमः यद्यपि चम्पूकारैः न रक्षितः तथापि महाकविना बाणेश्वरेण तु सुष्टुपरिपालित एषः नियमः।

अस्मिन् चित्रचम्पूकाव्ये प्रधानतया शान्तरसः उपनिबद्धः। यद्यपि शान्तरसविषये धनञ्जयादयो विवदन्ते तथापि श्रव्यकाव्ये सर्वैराचार्यैः आनन्दवर्धनाऽभिनवगुप्तमम्मटप्रभृतिभिः स्वीकारात्।

तदुक्तमानन्दवर्धनेन-

**शान्तश्च तृष्णाक्षयसुखस्य यःरकरिणाम यः परिपोषस्तल्लक्षणो रसः प्रतीयत एव**[13]

तथा चोक्तम्-

**यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।**
**तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्।**। इति।

अभिनवगुप्तश्च तत्रैवाशङ्कय समाधते -'ननु नास्त्येव शान्तो रसः, तस्य तु स्थाय्येव नोपदिष्टो मुनिना' इति। तृष्णानां विषयाभिला-षाणां य क्षयः सर्वतो निवृत्तिरूपो निर्वेदः, तदेव सुखं, तस्य स्थायिभूतस्य यः परिपोषो रस्यमानतां कृतस्तदेव लक्षणं यस्य, स शान्तो रसः[14] प्रतीयत एव।

मम्मटश्चाह-

**निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः**[15]।। इति।

पण्डितराजस्तु न केवलं श्रव्यकाव्ये, अपि तु नाट्येऽपि शान्तं रसं व्यवस्थापयामास। शान्तरसस्यानित्यत्वेन ज्ञातं जगदालम्बनं, वेदान्तश्रवणतपोवनतापसदर्शनाद्युद्दीपनम्, विषयारुचिः शत्रुमित्रौदासीन्यचेष्टाहानिनासाग्रदृष्ट्या-दयोऽनुभावाः हषर्षोन्माद- स्मृतिमत्यादयो व्यभिचारिणः[16] सन्ति। निर्वेदः स्थायिभावः।

**अथरसनिरूपणम्-**

**शान्तरसः-** शान्तरस एवात्र चम्पूकाव्ये प्रारम्भोऽन्तं यावदनुस्यूतः क्वचिदुन्मग्नतया क्वचिन्निमग्नतया च। तथा हि राज्ञः शयनमन्दिरगमनानन्तरं शयनोपक्रमे "निबद्धपद्मासनो विदलितविषयविषमवासनो झटिति तत्कालकलितपरमनिर्वेदहेतिं धारयामास। नातिदीर्घदुरन्तपाशसंयमनादुन्मोच्य मनोवृत्तिं, निरस्य चास्याः प्रपञ्चमयमहागहनसञ्चारचातुरीं मूलाधार-चक्राधिष्ठितलिङ्गालम्बितसार्धत्रिवलयाकृतिमतितनीयसीं प्रसक्तां कुण्डलिनीमिव...... जनितानन्दभरकलित-विपुलपुलककदम्बतया.......सुष्वाप"। एतदुपक्रमे स्वप्ने मृगयोद्योगी राजा सत्सङ्गसंज्ञं नाम महासरो यदा प्रापत् तदा.... 'विलोकनमात्रादेवापगतनिखिलश्रान्तिसन्तानो विगलितनिःशेषनिखिलचिन्तासन्तानसन्तापतया च विशदी-भूतान्तःकरणकरणो मुहूर्तमात्रं ध्याननिमीलितलोचनो निश्चलनिर्मलमानसः समुत्पन्नसमाधिरिव कामपि परमामननुभूतचरीं परमप्रेमानन्दपरम्परासहचरीं निर्वृत्तिमाससाद' इत्यादौ शान्तो रसः स्वदते। ततस्तत्परम्परायाम्- अशरीरा वाणी उद्बोधयति -

**आदौ श्रीलगुरुप्रसादवशतः शुद्धस्वभावं मही-**
**खण्डं पश्यति तत्प्रभाववशतः सत्सङ्गसंज्ञं सरः।**
**पीत्वैतत्सलिलं च याति पदवीं स्वान्तप्रसादाभिधा-**
**मायासच्युतिमुत्तरोत्तरमहानन्दं ततो विन्दति।।**

ततः

**प्रत्यक्षीकुरु भूमिपाल पुरतः सम्पीड्यमानं महा-**
**भागं कञ्चन कैश्चिदद्य तु समासङ्गान्महत्यास्ततः।**
**मुक्तप्रायममुक्तबन्धनमहाप्रोद्दामकारागृहाद्-**
**घोरात् पथ्यमपथ्यमेव सततं मन्वानमत्याकुलम्।।**

इत्युपक्रम्य त्रिगुणपाशैरविद्यया बद्धस्य सुकुमारकुमारस्य दर्शनं ततस्तद्बन्धनमुक्तिः परमेशे लयः तद्विषयकप्रश्नाः तत्राद्वैतवेदान्तसिद्धान्तप्रतिपादनेषु सर्वत्र शान्तस्यैवानुपम आस्वादः सहृदयैः क्रियते।

एवं तीर्थयात्राक्रमे वाराणसी दर्शयन्त्या प्रेमाभक्तिदेव्या उक्तौ -

**तीर्त्वैनां पुरतः प्रपञ्चविटपिप्रोद्दामघोराटवी-**
**मूलोन्मूलनकर्तरीं च नगरी पश्यान्धकध्वंसिनः।**
**यां योगेन परेण यान्ति पदवीं कालेन सङ्क्लेशिता-**
**स्तामेषां विदधाति जीवनभूतामन्त्यक्षणे हेलय।।**

इत्यादौ सम्पूर्णवाराणसीवर्णने प्रयागवर्णने त्रिवेणीसङ्गमवर्णने अयोध्या वृन्दावनादिवर्णने सर्वत्र शान्त एवानुस्यूतो वर्तते। ततः 'यां मायां समुदीरयन्ति कृतिनो नाद्यामविद्यां तथा' इत्यारभ्य वृन्दावनरहस्यदर्शने स एव रस उद्भूततया लक्ष्यते-

**आलोक्यावेहि सद्यो दलितकलिमलं तीर्णसंसारसिन्धुम्।**
**जीवन्मुक्तं कृतार्थं स्वमपि नरपते नास्त्यतः प्रार्थनीयम्।।** इत्यादौ।

इत्थमुपक्रमत उपसंहारं यावत् शान्त एव रसोऽङ्गितया प्रतिपादितः। परं महर्षिभरतमुनिप्रतिपादितदिशा-

**भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।**
**विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते।।**
**स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।**
**पुनर्निमित्तापाये तु शान्त एव प्रलीयते**[17]।।

इति रीत्या शान्तस्यैव विकारभूताः शृङ्गारादयः सन्ति। दयावीरधर्मवीर-दानवीरादयोऽपि शान्तस्यैव नामान्तराणि सन्ति, तथा हि भरतमुनिः –

**दानवीरं धर्मवीरं युद्धवीरं तथैव च।**
**रसवीरमपि प्राह ब्रह्मा त्रिविधसम्मितम्** [18]।।

इति रीत्या रसान्तराणि निर्दिश्यन्ते। तथा हि शृङ्गारस्य द्वौ भेदौ, संयोगो विप्रलम्भश्च। तत्र वृन्दावनरहस्यदर्शनावसरे द्वयोरुदाहरणं दृश्यते। यथा-

**श्रीराधाश्रवणावतंसनलिनघ्राणच्छलादाननं**
**तस्याश्चारुकपोलमूलसरणिं सञ्चारयत्यच्युते।**
**शङ्के वारयितुं रुषा परुषया सुप्तोत्थिता प्रोच्चकै-**
**स्तीक्ष्णा द्वारचमूस्तनूरुहततिव्याजा समं भ्राजते।।** इति ।

सम्भोगशृङ्गारस्य। विप्रलम्भेऽर्याविप्रलम्भस्य, यथा-

**वीक्ष्यान्योऽ न्यहृदन्तरे निजनिजच्छाये पराशङ्कयाऽ -**
**न्योऽन्यं व्याक्षिपतोः किमुत्थितमिथः कायप्रवेशेच्छयोः।।** इत्यादौ।

शृङ्गारस्य स्त्रीपुंसां वालम्बने चन्द्रिकावसन्तविविधोपवनरहःस्थानादय उद्दीपन- विभावाः तन्मुखावलोकनतद्गुण-श्रवणकीर्तनादयोऽन्ये सात्त्विकभावाश्चानुभावाः स्मृति- चिन्तादयो व्यभिचारिणो भवन्ति। रतिः स्थायिभावः।

**वीररसः-**

वीररसस्य द्विषदाद्यालम्बनं तत्पराक्रमदर्शनाद्युद्दीपनम्, प्रहारप्रतिप्रहाराद्यनुभावः, हर्षवेगादयो व्यभिचारिणः। उत्साहः स्थायिभावः। स च 'दूरादेव विलोक्य यस्य महतीं सेनामिवाक्षोहिणी.... ह्वयम्। इत्यत्र द्रष्टव्यः -

**यस्योत्तुङ्गतुरङ्गदारुणखुरक्षोदेन कुम्भ्युल्लसत्-**
**कुम्भव्रातसमुच्छलन्मदजलैर्याभूरभूद् दुस्तरा।**
**तस्यैवाश्वगणैः खुराद्धतरजो राजीभिरेषाक्षणा-**
**न्नीता भो मरुतां तथा च मरुतां संवर्धनापातनैः।।**

इत्यादौ तथा-

**क्षोणीन्द्रे चित्रसेने निजबलनिवहैर्दक्षिणाशावतंसे**
**शङ्के शङ्काकुलं वा विगलितमहिमा न्यस्तदण्डो बभूव।**

**कुम्भोद्भूतेन सार्धं प्रचुरमपि तपः संविधास्यन् सुघोरं**
**युक्तार्थं धर्मराजाह्वयमयमधुना कर्तुकामो यमोऽपि।।**

महाराष्ट्रनरेन्द्रसाहुराजस्य गौडदेशे आक्रमणसमयेऽपि वर्तते, यथा- 'प्रबलवलबहलहलहलकोलाहलहेषावृंहितचित्कृति-भेरी भाकृतिघण्टाटकृतिखड्गझङ्कृतिवीरहकृति .......... समुत्तस्थौ'। इत्यत्र।

**'यान्त्येकेन दिनेन योजनशतं हीनास्त्रदीनान् स्त्रियो**
**बालान् घ्नन्ति हरन्ति वित्तमखिलं साध्वीश्च सीमन्तिनीः'।।**

इत्यादौ वीररसाभास एव। प्रतिनायकगततया वर्णितः।

**रौद्ररसः-**

रौद्रस्यागस्कृतपुरुषादिरालम्बनं तत्कृतोऽपराधादिरुद्दीपकः वधबन्धादिफलको नेत्रारुण्यदन्तपीडनपरुषभाषण-शस्त्रग्रहणादिरनुभावः, अमर्षवेगौत्र्यचापलादयः सञ्चारिणः, क्रोधः स्थायिभावः। स च-

**पद्मानामहमेव बान्धव इति ख्यातं त्रिलोकीतले**
**किं नैतानि मुखाम्बुजानि कुलजा वृन्दस्य दृष्टान्यपि।**
**इत्थं खेदवशात् सहस्त्रगणितैस्तीत्रैः करैरेकदा**
**तान्याकर्षति निश्चितं प्रकुपितः श्रीमान् दिनाधीश्वरः।।**

इत्यादौ द्रष्टव्यः।

**अद्भुतरसः-**

अद्भुत्तरसस्यालौकिकचमत्कारकृद्वस्त्वालम्बनं तत्साक्षात्काराद्युद्दीपनं नेत्रविस्फारस्तम्भरोमाञ्चादिरनुभावः वितर्कादिश्च व्यभिचारी भावः। विस्मयः स्थायिभावः। स च-

**एतस्मिन् मृगयारतौ नरपतौ श्रीचित्रसेने मृग-**
**श्चित्रश्चित्ररयस्तनोति परितश्चित्रा गतीश्चित्रदृक्।**
**एतद्वेगवपुर्विलोचनचमत्कारान् समालोकयन्**
**लोको विस्मयविस्मृतान्यविषयश्चित्रायते सर्वतः।।**

इत्यादौ मृगवर्णने दृश्यते।

**भयानकरसः-**

भयानकरसस्य भयावहवस्त्वालम्बनं तद्विकटव्यापाराद्युद्दीपनं मुखशोषपलायनादि- रनुभावः जाड्यकम्पादयो व्यभिचारिणः, भयं स्थायिभावः। स च मृगयारतं चित्रसेननृपतिबलं समवलोक्य पलायमानानां पशुपक्षिणां वर्णने द्रष्टव्यः। यथा-'ततश्च मुहुर्मुहुरितस्ततः पलायमानानां वृकवराहवारणवानरवनविडालवञ्चकव्यालवनमानुषवयसां कोककुम्भिकण्ठीरव-कालसारकुम्भीनसकाद्रवेयाणां चमूरुचमरीचीनमुख-मृगमहिषमहामातङ्गानां।। शृङ्गाखुरदनवदनघोणाघनघनघर्घरद्युत्कृतिचित्कृतिहुकृति..... भूवलयम्।। इति। करुणहास्यवीभत्सानां यद्यपि स्फुटं निरूपणं नोपलभ्यते तथापि प्रसङ्गावशात् किमपि कुत्रचिदस्फुटं वर्णनं दृश्यते, तत्र करुणस्य स्थितिः जीवदशावर्णने दृश्यते-

**बद्धं तत्र विचेष्टमानमनिशं निष्कारणद्रोहिभिः।**
**दुर्वारैरपि पीड्यमानमवशं तैरेव रात्रिन्दिवम्**।। इत्यादौ।

अस्य बन्धुनाशादयः दुरं गता आत्मीयजना आलम्बनानि, तत्सम्बन्धिगृहतुरगाभरणदर्शनादयस्तत्कथाश्रवणादयस्तवस्थाविलोकनं चोद्दीपकाः गात्रक्षेपाश्रुपातादयोऽनुभावाः ग्लानिक्षयमोहविषादचिन्तौत्सुक्यदीनताजडतादयो व्यभिचारिणः। शोकः स्थायिभावः। इति।

**हास्यरसः-**

हास्यरसस्य विकृतवागादिमत्पुरुषादिरालम्बनम्, तद्विकृतिरुद्दीपनम्, रदनप्रकाशादिरनुभावः, श्रमोद्वेगादिश्च व्यभिचारिभावः। हासः स्थायिभावः। स च यद्यपि स्फुटं नास्ति, तथापि राधाकृष्णयोः संवादे लक्ष्यते-

तथा हि राधा प्राह-

**क्क भूषणानि सन्ति मे क्क च द्वितीयमम्बरं**
**क्क केशपाशबन्धनं क्क वा कपोलचन्दनम्।**
**त्वया हृतानि तानि मे दुरन्तचौरचातुरीं**
**विहाय देहि सत्वरं विधेहि वेह सत्त्वरम्।।**

ततः श्रीकृष्णः

**सुविश्रुता हिते पदो स्तुलादिकोटिशून्यता**
**विहारहारिभूषणौ स्तनौ तवापि सुन्दरि।**
**अनङ्गदौ च ते करौ समस्तलोकविश्रुतौ**
**पुरो द्वितीयमम्बरं समस्तलोकविस्सरम्।।**

इत्थं तयोः विवादे लक्ष्यते।

इत्थमङ्गतयाऽन्ये रसा अत्र वर्णिताः सन्ति। यद्यपि स्वयंप्रकाशस्याखण्डस्या- द्वितीयस्य रसस्याङ्गाङ्गिभावो नोपयुज्यते, तथाप्यत्र बाहुल्येन सकलप्रबन्धव्यापितया निरूपितोऽङ्गी। क्वचन प्रदर्शितो-ऽल्पैर्विभावादिभिर्वा निरूपितोऽङ्गरूपतामापद्यते। इति। प्रायः सर्वत्र मङ्गलश्लोके देवस्तुतौ च क्वचित्कविनिष्ठा क्वचिद्राजनिष्ठा देवादिविषयिणी रतिर्भावध्वनिः वर्तते।

यद्यपि केषाचिन्मते (रूपगोस्वामिन सन्तगोस्वामिजीवगोस्वामिनां) मते भक्तिः रसोऽस्ति तथापि मम्मटपण्डित-राजादिभिर्भक्ते रसत्वं निराकृतं, तत्र भावध्वनिरेव वर्णिता। अत रामचन्द्रगोविन्ददेवादिस्तुतौ भावध्वनिरेव। "वन्दे करीन्द्रानमिन्दुमौली" इत्यादौ कविनिष्ठगणेशविषयकरतिर्भावध्वनिरेव द्रष्टव्यः। इति।

**निष्कर्षः-**

शोधपत्रेऽस्मिन् विशेषतया रसनिरूपणं क्रियते। काव्यमिदं चम्पूकाव्यं पुनः भक्तिरसाश्रितम्। अतः अत्र कथं शान्तरसस्य प्राधान्यं अपि च कथं वीरादि रसानां व्यवहाराः तदेवाबधेयमस्माभिः। अत्रालङ्कारसम्प्रदायाः तेषु रससम्प्रदायः, रससम्प्रदाये रसानां प्रयोगः सोदाहरणं वर्ण्यते। भाविशोधच्छात्राः अत्रतः नवरसः रससम्प्रदायः, काव्येषु रसानां प्रयोगश्च ज्ञातुं शक्नुवन्ति।

**परिशीलितग्रन्थसूची-**


- **संस्कृतसाहित्येतिहासः**, धीरेन्द्रनाथवन्द्योपाध्यायः पश्चिमवंग-राज्यपुस्तकपर्षदः, कोलकाता, १९८८, प्रथमसंस्करणम्।
- **ध्वन्यालोकः**,डॉ सत्यनारायणचक्रवर्ती, आनन्दवर्धनः, कलिकाता।
- **नलचम्पू**, डॉ अञ्जलिकामुखोपाध्यायाः,संस्कृतवुकडिपो, कोलकाता, २०२०।
- **संस्कृतसाहित्येर रूपरेखा** ,डॉ विमानचन्द्रभट्टाचार्यः, विद्योदय लाईव्रेरी, कोलकाता, १९५८।

- **चम्पूरामायणम्** अशोकवन्द्योपाध्यायः, सदेसः, कोलकाता, २४२३ बंगाब्दो।
- **काव्यप्रकाशः**,आचार्यविष्वेश्वरः, ज्ञान मण्डल लिमिटेड, वाराणसी, २०२७ वि।
- **अलंकारशास्त्रेतिहासः**,डॉ रामकुमारदाधीचः, हांसाप्रकाशन, जयपुर, २०१९।
- **संस्कृतसाहित्येतिहासः,** आचार्यरामचन्द्रः, चोखाम्बाविद्याभवनम्, वाराणसी, २०१९।
- **च्मपू-काव्य का आलोचनात्मक एवं ऐतिहासिक अध्ययन**, डॉ छविनाथ त्रिपाठी, छौखम्बा प्रकाशन, १९६५।
- **चित्रचम्पू,** बाणेश्वरभट्टाचार्यः। चोखाम्बाविद्याभवनम्, वाराणसी।
- **संस्कृतशोधप्रविधिः**,प्रो.प्रभूनाथ द्विवेदी, शारदासंस्कृतसंस्थाथनम्, वाराणसी, २०२२, द्वितीयसंस्करणम्।
- **श्रीश्रीमुक्ताचरित्रचम्पूः,** श्रीपादरघुनाथदास। श्रीहरिनाम संकीर्तन मण्डल, वृन्दावन। द्वितीयसंस्करण,2020.
- **श्रीश्रीआनन्दवृन्दावनचम्पू,** रूपगोस्वामी। श्रीहरिनाम संकीर्तन मण्डल, वृन्दावन। 2012.
- **संस्कृतसाहित्ये** पश्चिमवङ्गस्यावदानम्, ड. नारायणदाशः, तुहिना प्रकाशनी, कलिकाता-06। प्रथमसंस्करणम्-2013.
- **संस्कृतसाहित्येर रूपरेखा** ,डॉ विमानचन्द्रभट्टाचार्यः, विद्योदय लाईब्रेरी, कोलकाता, १९५८।
- **SANSKRIT CULTURE OF BENGAL.** Suresh Chandra Banerji. Sharda Publishing House, Delhi-110035, First Published-2004.
- **BENGAL CONTRIBUTION TO SANSKRIT LITERATURE AND STUDIES IN BENGAL VAISNAVISM.** S.K. DE. University of Dacca.1943. National Sanskrit university library.
- **শ্রীশ্রীগৌরাঙ্গ চম্পূঃ,-** শ্রীলরঘুনন্দনগোস্বামী, শ্রীশ্রীগৌরাঙ্গরগ্রন্থমন্দিরতঃ, বরাহনগর, পশ্চিমবঙ্গ, প্রথমমুদ্রণম্-শ্রীচৈতন্যাব্দ ৪৭২.(Digitized and uploaded by Hari Prasad Das on 04june 2013
- **श्रीश्रीगोपालचम्पू,** श्रीजीवगोस्वामी, श्रीहरिनाम संकीर्तन मण्डल, वृन्दावन। पञ्चमसंस्कर-2022.


**सन्दर्भ**

1. अग्निपुराणे।
2. व्याक्तिविवेके।
3. काव्यादर्शः
4. काव्यादर्शः
5. ध्वन्यालोकः।
6. ध्वन्यालोकः
7. नलचम्पू
8. नाट्यशास्त्रम्।
9. काव्यप्रकाशः।
10. काव्यप्रकाशः।
11. काव्यप्रकाशः।
12. साहित्यदर्पणः।
13. ध्वन्यालोकः।
14. ध्वन्यालोकः। लोचने।
15. काव्यप्रकाशः।
16. रसगङ्गाधरः।
17. भरतनाट्यशास्त्रम्।
18. नाट्यशास्त्रम्।